# हरिवंशम् – भविष्यपर्व

## नीलकण्ठव्याख्यानसमेतं

## अथ सप्तमोऽध्यायः

## पुष्करप्रादुर्भावम्

**श्रीमद्गोपालमानम्य व्याकुर्वे पुष्करोद्भवम् ।**
**ख्यातश्चतुर्धरः शिक्षानयप्रणयसंयमैः ॥ १**
**उत्तानेषु न कोशविग्रहबलं पद्येषु यत्र श्रितं**
**गम्भीरेषु न सेतवो न विहिताः कूटा न न स्फोटिताः ।**
**न च्छिन्ना न तमश्चराननततिर्भक्ता न नाह्लादिता**
**नो दीनाश्च विभीषणा न विहिताः श्रीलक्ष्मणार्यश्रितैः ॥ २**
**कस्त्र्यंबकमृते कालकूटाभं पुष्करोद्भवम् ।**
**कण्ठे कर्तुं क्षमो लोके कामजित्पुरुषोत्तमः ॥ ३**

तत्र तावदिह *वक्तुमर्हसि धर्मज्ञो यशो नारायणात्मकम् (३-७-९)* इति *न तस्येशे कश्चन तस्य नाम महद्यशः तस्मिन् यशो निहितं विश्वरूपम्* इति श्रुतिप्रसिद्धस्य नारायणात्मकस्य यशः शब्दितस्य वक्तव्यत्वेनोपक्रमात् *अधीत्यसर्वमध्यात्मं देवलोके महीयते (३-३२-६१)* इत्युपसम्हारेण चास्य कृत्नस्य वाक्यसन्दर्भस्य षड्विंशत्यध्याय संमितस्य ब्रह्मापरत्वं निश्चीयते। यत्त्विह जगदुद्भवाधिकमुक्तं *तत् फलवत्संनिधावफलं तदङ्गम्* इति न्यायेन महावाक्यं प्रतिपाद्य ब्रह्माद्वैत प्रतिपत्यर्थमेव ये चात्र एकार्णववत् देवासुरादि शब्दास्तेऽपि यथा । *अजामेकां लोहितशुक्लकृष्णां द्वा सुपर्णा सयुजा सखाया* इत्यादि श्रुतिषु मेषीशकुन्यादिवृत्तान्त कथनमुखेन ब्रह्मत्वं निरूपितम्। तथा निर्विशेष चिन्मात्रशमकामादि चेतोवृत्ति विशेषपरतया व्याख्येयाः। *सलिल एको द्रष्टाद्वैतो भवति, द्वयाह प्रजापत्या दैवाश्चासुराश्च* इत्यादि श्रुतिष्वपि अनयैव भङ्ग्या ब्रह्मतत्त्वनिरूपणदर्शनात्। एवं चैकार्णवादिशब्दानां सलिलादि श्रुतिसमानार्थत्वेन तयोर्मूलमूलिभावे संभवति खण्डप्रलयपरतया तद्व्याख्यानमसत् स्वप्याकाशादिषु जलधातु मात्रस्य सद्भावसंभवात् तत्पौर्वापर्यविरोधातुपेक्ष्यं । एवं चात्र

*एकार्णवं विशुद्धा चित् विष्णुरव्याकृतं नमः ।*
*पुष्करं द्विविधं कार्यं शमकामौ सुरासुरौ ॥*
*अनयैव दिशाध्यात्मं आधिदैविकरूपकैः ।*
*निरूपितं पुराणेषु पूर्वेष्वपि न संशयः ॥*
*पुष्करं पुष्करप्रादुर्भावे तदिह दृश्यते ।*
*अतस्तद्व्याख्यया सर्वं पुराणं व्याकृतं भवेत् ॥*
*विद्याधिकारावगतावश्वमेधादिकेष्विह ।*
*इन्द्रवृत्रादयः शब्दा आत्ममोहपराः कृताः ॥*
*अत्रापि ब्रह्मणस्तद्वत्पारोक्ष्येण निरूपणम् ।*
*चक्रे दुर्जनचोरेभ्यस्तत्त्वरत्नं सुरक्षितुम् ॥*
*अनयैव दिशा वेदे ज्ञेयं वृत्रवधादिकम् ।*
*इत्याशयेन भगवान्व्याख्यत्पारोक्ष्यतत्परम् ॥*

जनमेजय उवाच

**प्रभावं पद्मनाभस्य स्वपतः सागराम्भसि ।**
**पुष्करे वै यथोद्भूता देवाः सर्षिगणाः पुरा ॥ ३-७-१**

पुष्करप्रादुर्भावे अध्यात्मविद्यास्वरूपेणाधिदैविकादिरूपकेण च दर्शितां यथामति व्याकुर्मः |तत्र पूर्वं भविष्ये सम्सारिणामत्युल्बणां गतिं श्रुत्वा अत्यन्तमुद्विग्नः *तरति शोकमात्मवित्* इति श्रुतेः *नान्य पन्था विद्यतेऽयनाय* इति श्रुतेश्चात्मज्ञानादन्यच्छ्रेयःसाधनमपश्यन् तदेव सविस्तरं जिज्ञासमानो जनमेजय उवाच - प्रभावं पद्मनाभस्येत्यादि || पद्मनाभस्य प्रभावमाख्याहीति सम्बन्धः |पद्मं कृत्स्नकार्यप्रपञ्चः स नाभौ गर्भे यस्य सः मायोपाधिरीश्वरः |तस्य प्रभावं सृष्ट्यादि सामर्थ्यं कथयेत्यर्थः |किं

भूतस्य पद्मनाभस्य? सागरांभासि स्वपतः सागरवदनन्तमपारं च अम्भ इवाम्भः *एकं रसं महत्भूतमनन्तमपारं, सलिल एको द्रष्टाद्वैतो भवति* इत्यादि श्रुतिप्रसिद्धं ब्रह्म न तु प्राकृतसमुद्राम्भः । *नष्टानलानिले लोके नष्टाकाशमहीतले* इति वाक्यशेषे तत्कारणस्याग्न्यादेरपि नाशे तदवस्थानायोगात् । तस्मिन् सागराम्भसि *शुद्धे ब्रह्मणि स्वपतः स्वपितो भवति । तस्मादेनं स्वपितीत्याचक्षते* इति स्वपितीनामनिर्वचनात् *ईश्वरग्रासस्तुरीयतुरीयः, अव्यक्तं पुरुषे ब्रह्म निष्फले संप्रलीयते* इति श्रुतिस्मृत्योः ईश्वराव्यक्तशब्दितस्य मायाविनः शुद्धे लयोपलम्भात् स्वं निजं मायातीतं रूपं पतति गच्छतीति स्वपन् तस्य स्वपत इति योगेन निष्कले ब्रह्मणि कैवल्ये समाधौ वा लीयमानस्य मायाविनः प्रभावं ब्रूहीति **मुख्यप्रश्नः** । पुष्करे ब्रह्माण्डे देवा ऋषयश्च कथमुत्पन्ना इति वा । *व्योमपुष्करमम्बरम्* इति पुष्करशब्दस्य व्योमवाचित्वेन व्योमपर्यायाणां च प्रायेण *खं ब्रह्म अमृतं दिवि परमे व्योमन्* इत्युपनिषत्स्वव्याकृताकाशे प्रसिद्धेः । पुष्कराख्ये तस्मिन्देवर्षयः इन्द्रियप्राणाः सूत्रात्मेति यावत्कथमुत्पन्न इति **द्वितीयप्रश्नः** ।

**एतदाख्याहि निखिलं योगं योगविदांपते ।**
**शृण्वतस्तस्य मे कीर्तिं न तृप्तिरभिजायते ॥ ३-७-२**

योगं सूत्रे सम्शुद्धानामधिगमोपायं आख्याहीति
**तृतीय प्रश्नः** ।

**कियन्तं चैव कालं वै शयिता पुरुषोत्तमः ।**
**किमर्थं शयते कालं तस्य कालस्य संभवः ॥ ३-७-३**

*नो व्योमापरो यत् तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमः* इति श्रुतिस्मृत्योः विशेषणीभूत

मायातिरोधानप्रादुर्भावाभ्यां सृष्टे प्रागूर्ध्वं च तद्धेतोर्मायाविनः स्थितिकालावधीं पृच्छति कियन्तामिति । स्थित्वेति शेषः । शायितेति लुडन्तम् । शयनं करिष्यतीत्यर्थः । कियता चैव कालेन स शेते इति पाठे तु महानपि कालो भोगलुब्धानां अल्प एवेत्यभिप्रेत्य *वर्तमानसामीप्ये वर्तमानवद्वा* इति शेते इति लट् प्रयुक्तः । तृतीयं पृष्ट्वा चतुर्थं पृच्छति किमर्थमिति । कालस्य संभवो योनिः सन् काले किमर्थं शेते परिमितकालावेव सृष्टिप्रलयौ कुतः करोति । प्रवाहनित्यां वा सृष्टिं कुतो न करोतीत्यर्थः । कालमिति द्वितीयात्याऽत्यन्तसंयोगे । शयत इति शपोऽलुङ्गार्षः । श्रयत इति पाठः स्वच्छ ।स्वपते इति पाठे स्वपतीत्यर्थः । आत्मनेपदं चार्षम् ॥

**कियता चैव कालेन प्रबुध्यति सुराधिपः ।**
**कथमुत्थाय भगवानसृजन्निखिलं जगत् ॥ ३-७-४**

लयकालावधिं पृच्छति कियतेति । एवं कियन्तमित्यादिना सार्धश्लोकेन स्वपत इति प्रथमश्लोकपदार्थं विविच्य पृष्ट्वा यथोद्भूता इत्यपि तथैव पृच्छति सार्धेन - कथमिति । कूटस्थस्य । द्वितीयस्य कथमुपादानत्वं युज्येतेत्यर्थः ॥

**के प्रजापतयस्तात आसन्पूर्वं महामुने ।**
**कथं निर्मितवांश्चैव चित्रं लोके सनातनः ॥ ३-७-५**

एतदेवाह - सनातनः सर्वदैकरूपः कूटस्थ इत्यर्थः ॥

**एवमेकार्णवे लोके नष्टे स्थावरजङ्गमे ।**
**नष्टे देवासुरगणे प्रनष्टोरगराक्षसे ॥ ३-७-६**

अद्वितीयत्वमाह एवमिति द्वाभ्याम् | एकार्णवे शुद्धचिन्मात्रे लोके | *आत्मानमेव लोकमुपासीतः* इत्यात्मनि लोकशब्दस्य श्रौतप्रसिद्धे | लोके नष्ट इत्यधिकरणे सप्तम्यौ |चिदात्मनि स्थावरादावदर्शनं गते सतीत्यर्थः |

**नष्टानलानिले लोके नष्टाकाशमहीतले ।**
**केवलं गह्वरीभूते महाभूतविपर्यये ॥ ३-७-७**

एतेन योगमाख्याहीति तृतीयप्रश्ने योगशब्दार्थो विवृतः | एतदेवोपसंहरति | केवलमिति | गह्वरं नैघण्टुप्रसिद्ध्याकाशं न शून्यमिति तेन लक्ष्यते | गह्वरमिति त्रिविधभेदशून्यत्वात् गह्वरीभूते इत्यभूततद्भावार्थस्य च्वेः प्रयोगः | *शून्यतुलां दधत* इत्युक्तं श्रीभागवते वेदस्तुतौ || महाभूतानि वियदादीनि तेषां विपर्ययः | प्रलयो योस्मिंस्तस्मिन्नेकार्णवे सतीत्यर्थः |

**प्रभुर्महाभूतपतिर्महातेजा महाततिः ।**
**आस्ते सुरगुरुश्रेष्ठो विधिमादाय कं मुने ॥ ३-७-८**

प्रभुरिति | प्रभुश्चिदात्मा कां विधिं नियतिम् | *भाग्यं स्त्री नियतिर्विधि* इति साहचर्याद्विधिशब्दस्य स्त्रीत्वम् | प्रभुः किमदृष्टरूपं सहायमादाय आश्रित्य महाभूतपतिः वियदादि स्रष्टा ईशः, महतेजा इति समष्टिस्तैजसः सूत्रात्मा महाततिरिति अत्यन्तविस्तृतो विराट् च भूत्वा आस्ते | सुराः महदादयास्तेषां गुरुरीशः तस्यापि श्रेष्ट इति विभोर्विशेषणम् ||

**तन्मे त्वमुपपन्नाय ब्रह्मन्नेतदसंशयम् ।**
**वक्तुमर्हसि धर्मिष्ठ यशो नारायणात्मकम् ॥ ३-७-९**

*अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्चते* इति न्यायमाश्रित्य ब्रह्माद्वैतं प्रसाध्यम्। तच्चाध्यारोपस्यैव दुर्वचनत्वादनुपपन्नम्। त्वया च असकृत्तदेवोपपादितमतः संशयाविष्टस्य मे निःसंशयं ज्ञानं यथा स्यात्तथा वक्तुमर्हसीत्याह - तन्मे त्वमिति । उपपन्नाय योग्याय। यशो नारायणात्मकम्। नरोऽविद्यावच्छिन्नं ब्रह्म, तेन स्वात्मनि कल्पितम्, ईशसूत्रविराडन्तं नारं तस्य समूलस्य अयनं स्थानं नारायणः शुद्धं वस्तु तदात्मकं यशः वैभवविलासः ईशादिघटनान्तः तं वक्तुमर्हसीति संबन्धः। *अशेर्देवने युट् च* इति अशेर्सुन्प्रत्यये युट्। एतेन *अनन्तरो बाह्यः कृत्स्नः प्रज्ञानघनः* इति श्रुतिप्रसिद्धं सबाह्याभ्यन्तरं शुद्धं चिन्मात्रं नारायणरूपमिति सर्वत्र श्रुतं तदुपपत्तिपूर्वकं व्युत्पादयेति सूचितम्॥

**प्रादुर्भावं पुरस्कृत्य भूतं भव्यं महात्मनः ।**
**श्राद्धानामुपविष्टानां भगवन्वक्तुमर्हसि ॥ ३-७-१०**

भूतं विद्वद्दृष्ट्या नित्यसिद्धप्रादुर्भावं अधिष्ठानातिरेकात् मूढदृष्ट्या भव्यं उत्पद्यमानम्। श्रद्धा विद्यते येषां ते श्राद्धाः। *प्रज्ञाश्रद्धार्चाभ्यो णः* इति मत्वर्थीयो णः ॥

वैशम्पायन उवाच

**नारायणयशोज्ञाने या भवेद्भवतः स्पृहा ।**
**त्वद्वंशानघ पूतस्य कार्यं कुरुकुलर्षभ ॥ ३-७-११**

प्रष्टारं प्रोत्साहयन् वैशम्पायन उवाच - नारायणेति - हे अनघ! हे कुरुकुलर्षभ! नारायणात्मक यशोज्ञाने या भवतः स्पृहा भवेत्सा त्वद्वंश्या त्वद्वंशे उचिता। विभक्तधनेषु

भ्रातृषु विभक्ता इतिवदुत्तरपदलोपः । सा स्पृहा पूतस्य यज्ञाद्यनुष्टानस्य कार्यं फलम् । *तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन* इति श्रुतेः । भूतस्येति पाठे लब्दजन्मन इदमेव कार्यं करणीयम् यद्भगवद्विचरोऽन्यथा निष्फलं जन्मेत्यर्थः ॥

शृणुष्वादिपुराणेभ्यो देवताभ्यो यथाश्रुति ।
ब्राह्मणानां च वदतां श्रुतोऽस्माभिर्महात्मनाम् ॥ ३-७-१२

श्रुतिं उपनिषद्वाक्यम् अनतिक्रम्येति यथाश्रुति । श्रुतः पद्मनाभस्य प्रभाव इति पृष्टस्य विशेषस्यानुकर्षः ॥

**तथा च तपसा दृष्टो बृहस्पतिसमद्युतिः ।**
**पाराशर्यस्ततः श्रीमान्गुरुर्द्वैपायनोऽब्रवीत् ॥ ३-७-१३**

तपसा पुण्येन दृष्टो मयेति शेषः । दृष्ट्वेति पाठे तपसा ध्यानेन दृष्ट्वा पद्मनाभस्य प्रभावमिति पूर्ववत् पृष्टानुकर्षः ॥

**तत्तेऽहं संप्रवक्ष्यामि यथाप्रज्ञं यथाश्रुतम् ।**
**न विज्ञातुं मया शक्यम् ऋषिमात्रेण भारत ॥ ३-७-१४**

तत्तेऽहं यद्देवतादिभ्यः श्रुतं यच्च द्वैपायनेनोक्तं तद्बाहुल्यात् सर्वं बोद्धुमशक्यमित्याशयेनाह - यथाप्रज्ञमिति । यथाश्रुतं विज्ञातुं विशेषेण ज्ञातुं मया न शक्यं । ऋषिर्मन्त्रद्रष्टा तन्मात्रेण । *सोऽहं भगवतो मन्त्रविदेवास्मिन्नात्मविद्* इति छान्दोग्ये सनत्कुमारं प्रति वदता नारदेनेवेत्यर्थः ।

**कः समुत्सहते ज्ञातुं परं नारायणात्मकम् ।**
**विश्वात्मनोऽयं ब्रह्माऽपि न वेदयति तत्त्वतः ॥ ३-७-१५**

परं पुरुषं नारायणात्मकं शुद्धचिदात्मकं यं पुरुषं ब्रह्माऽपि वेदोऽपि विश्वात्मनः साकल्यात् सर्वात्मना मुख्यवृत्त्येति यावत् न वेदयते *यतो वाचो निवर्तन्ते* इति श्रुतेः। कार्त्स्न्येन न वेदयते किं तु भागलक्षणया तु वेदयत इत्यर्थः॥

**श्रुतं मे विश्वदेवानां यद्रहस्यं महर्षिणाम् ।**
**तदिदं सर्वदेवानां तत्त्वतस्तत्त्ववादिनाम् ॥ ३-७-१६**

श्रुतं मे मया विश्वेषां देवानां महर्षीणां च। ह्रस्वत्वमार्षम्। यद्रहस्यं गोप्यं तत् इदं इदमेव यत्त्वया पृष्टं नारायणात्मकं यशः । कीदृशानां विश्वदेवानां तत्त्वतः अनारोपितरूपेण सर्वं देव आत्मैव येषां ते सर्वदेवास्तेषाम्। *सर्वं खल्विदं ब्रह्मेदं सर्वं यदयमात्मा* इति श्रुतेः। अत एव कृपया शिष्यान्प्रति तत्त्ववादिनां तत्त्वमेव वक्तुं शीलं येषां तेषाम्॥

**तदध्यात्मविदां चिन्त्यं कारणं चैव कर्मिणाम् ।**
**अधिदैवं च यद्दैवं तद्दैवमिति संज्ञितम् ॥ ३-७-१७**

कारणं प्रवर्त्तकं यत्तदैवं देवानां विदुषामिदं दैवं अधि अधिकं दैवं महाभाग्यं ज्ञानाख्यं। *यद्देवानां दैवं तदश्रवे तदाप्तवानिति - एषास्य परमा संपत्* इति श्रुतेः। तद्वस्तु दैवमदृष्टमिति संज्ञितं सर्वेषां सुखकरं भाग्यं *एतस्यैवानन्दस्यान्यानि भूतानि मात्रां उपजीवन्ति* इति श्रुतेः॥

**यद्भूतमधिभूतं च यत्परं च महर्षिणाम् ।**
**यत्सत्यं देवदृष्टं च यत्तद्वेदविदो विदुः ॥ ३-७-१८**

अध्यायशेषेण अनुवादमुखेन प्रश्नानां क्रमेण संक्षिप्योत्तराण्याह यद्भूतमित्यादिना | भूतं अनादि अनादित्वं व्यवहारे मायायामप्यस्तीत्यत उक्तं अधिभूतं सर्वेषु तेषु सद्रूपेणानुस्यूतम्, अनन्तमित्यर्थः | जाड्यरूपेण मायाऽपि सर्वत्रानुस्यूतेत्यत उक्तं - परमिति | महर्षिणां महर्षीणां ज्ञेयतयेति शेषः | परमुत्कृष्टं जडस्य परत्वायोगात् परत्वं मायोपाधिक्येऽप्यस्तीत्यत उक्तं - सत्यमिति | मायया बाधितत्वेन तस्यापि बाधितत्वादसत्यत्वं सत्यमप्यचिद्रूपं चेत्तत्राह - देवदृष्टं देवश्चक्षुरादि प्रत्यक्षं तस्यापि दृष्टं प्रत्यक्षं | *न द्रष्टेर्द्रष्टारं पश्ये प्राणस्य प्राणभूत चक्षुषश्चक्षुः* इत्यादिश्रुतेः | ज्ञानमात्रस्वरूपमित्यर्थः | वेदं *सत्यं ज्ञानमनन्तं ब्रह्म* इत्यादि विदन्ति ते वेदविदो विदुः | एतेन सागराम्भोरूपं शुद्धमुक्तम् ||

**यः कर्ता कारको बुद्धिर्मनः क्षेत्रज्ञ एव च ।**
**प्रधानं पुरुषः शास्ता एकस्तदभिशब्द्यते ॥ ३-७-१९**

अस्य तटस्थलक्षणमाह यः इति || कर्ता वियदादेः | कारको हिरण्यगर्भद्वारा भौतिकस्य | बुद्धिर्मनः इति महदहंकाररूपत्वमुक्तम् | क्षेत्रज्ञ इति साक्षिमात्रेण द्रष्टृत्वं | एतेन पद्मनाभप्रभाव उक्तः | उक्तेऽर्थे - *भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म एतत्* इति श्रुतिं प्रमाणयन् योगमाह - प्रधानमिति | प्रधानं जडम् | पुरुषो जीवः | शास्ता ईशः | एतत्त्रितयम् एक एव परमात्मेति ||

**कालः कालं स्वपयति द्रष्टा स्वाधीन एव च ।**
**प्राणः पञ्चविधश्चैव ध्रुवमक्षय एव च ॥ ३-७-२०**

तृतीयं प्रश्नोत्तरं कियन्तमित्यादिना सार्धश्लोकेन ईश्वरस्य कालाधीनत्वं चोदितं तन्निराचष्टेऽर्धेन - काल इति। कालं स्वपयति स्वापयति कालस्यापि काल इत्यर्थः। अत एव स्वाधीनो न तु कालाधीनः कथमुत्पायेत्यादिना साधन कार्यसृष्टिः पृष्टा तत्रोत्तरमाह - प्राण इत्यादिना सार्धद्वयेन॥

**उच्यते विविधैर्भावैस्तस्यैवानघ तत्परैः ।**
**स एव भगवान्सर्वं करोति विकरोति च ॥ ३-७-२१**

हे अनघ! यत् ध्रुवं अविनाशि अत एव अक्षयः ह्रासशून्यः स एव प्राणवृत्तिभेदेन पञ्चविधः। तत्परैः प्राणोपास्तिपरैः विविधैर्भावैः। प्राणादिकार्यभेदैर्हेतुभिरुच्यते। स एव च सर्वंवियदादि करोत्युत्पादयति। किमुपादानान्तरमपेक्ष्य? नेत्याह - विकरोति च माययैवात्मानं परिणामयतीत्यर्थः।

**योऽस्मान्कारयते कर्म तेनास्म व्याकुलीकृताः ।**
**यजामहे तमेवेशं तमेवेच्छाम निर्वृताः ॥ ३-७-२२**

यो अस्मान् कर्म कारयते। *एष ह्येव साधु कर्म कारयति* इत्यादि श्रुतेः। तेनैव च वयं व्याकुलीकृताः। विधिनिषेधगहने पातिताः सन्त आस्म आस्महे। *अनुदात्तेत्वलक्षणं आत्मनेपदमनियतम्* चक्षिङोङित्करणात् ज्ञापकात्। *तेन आस उपवेशने* अस्मात् परस्मैपदेऽपि आस्मेति साधु। यतस्तेन व्याकुलीकृताः अतस्तमेव यजामहे यज्ञैः इच्छाम। प्रार्थनायां लोडुत्तमबहुवचनम्। निर्वृताः शान्ताः सन्तः॥

**यो वक्ता यश्च वक्तव्यो यश्चाहं तद्ब्रवीमि वः ।**

**इदं शृणुत यच्छ्रेयो यच्चान्यत्परिजल्पथ ॥ ३-७-२३**

सर्वं चिन्मात्रमेवेत्याह द्वाभ्याम् - यो वक्तेति | वक्ता वाचः प्रवर्त्तकः वक्तव्योऽर्थः || अहं वक्तृत्वाभिमानी जीवः | यत् इदं शृणुत श्रवणक्रिया | यत् श्रेयो मोक्षः यच्चान्यत्स्वर्गादि प्रब्रूत नानाविकल्परूपम् ||

**याः कथाश्चैव वर्तन्ते श्रुतयो वाथ गह्वराः ।**
**विश्वं विश्वपतिर्देवाः सर्वं नारायणात्मकम् ॥ ३-७-२४**

कथाः भूतार्थवादाः गह्वराः रहस्यप्रतिपादकाः विश्वं पाल्यं विश्वपतिः पालकः देवाः करणानि सर्वं तत् नारायणात्मकमिति वः युष्मान्प्रति ब्रवीमिति संबन्धः ||

**यत्सत्यं यदनृतमादिमक्षरं वै**
**यद्भूतं भवति मिथश्च यद्भविष्यम् ।**
**यत्किञ्चिच्चरमचराव्ययं त्रिलोके**
**तत्सर्वं पुरुषवरः प्रभुर्वरिष्ठः ॥ ३-७-२५**

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि पुष्करप्रादुर्भावे सप्तमोऽध्यायः ॥

एतदेवोपसम्हरति - यत्सत्यमिति | सत्यानृते लौकिके आदिमम् आदौ भवं कारणं क्षरं च कार्यं तदुभयात्मकं भूतं अतीतं मिथश्च भवति परस्परजनकं बीजांकुरादि भविष्यमनागतं चरं परिणामि अचरं कूटस्थं वरिष्ठः नारायणः वरीयान् ईशः वरः समष्टिजीवः अपरो व्यष्टिजीवः कल्पितानेतानपेक्ष्य वरिष्ठत्वं शुद्धस्य प्रभोरिति भावः ॥
इति श्रीहरिवंशे भविष्यपर्वणि टीकायां पुष्करप्रादुर्भावप्रकाशे सप्तमोऽध्यायः ||

Harivamsha Maha Puranam - Part 3 - BhaviShya Parva

Itranslated by G. Schaufelberger, schaufel@wanadoo.fr August 22, 2008

Proof-read by K S Rmachandran, ramachandran_ksr@yahoo.ca

Electronic version with Nilakantha commentary prepared by A. Purushothaman, purushu55@gmail.com

Devanagari version prepared using latex-sanskrit package of Charles Wikner

If you find any errors compared to Chitrashala Press edition, send corrections to A. Harindranath, harindranath_a@yahoo.com